'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 3rd Semester Examination, 2021

## CC5-SANSKRIT

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*

विभाग-क

1. संस्कृतभाषया देवनागरीलिप्या च एकस्य उत्तरं प्रदेयम्। 12×1 = 12

(क) श्रीमद्भगवद्गीतानुसारेण कर्मयोगस्य स्वरूपम् आलोचयत।

(ख) श्रीमद्भगवद्गीतायाः तृतीयाध्यायमवलम्ब्य जगच्चक्रं विवृणुत।

2. संस्कृतभाषया देवनागरीलिप्यां एकस्य व्याख्या कार्या – 6×1 = 6

(क) यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर॥

(ख) न हि कश्चित्क्षणमपि जातु तिष्टत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥

3. वङ्ग भाषया आङ्गलभाषया वा अनुवादः कार्यः (द्वयोः) – 3×2 = 6

(क) श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥

(ख) अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।
यज्ञाद्भवन्ति पर्जन्यो यज्ञः कर्मसमुद्भवः॥

(ग) काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येमिह वैरिणम्॥

4. संस्कृतभाषया देवनागरीलिप्या च द्वयोः संक्षिप्तोत्तरं प्रदेयम् – 3×2 = 6

(क) विशिष्टः पुरुषः कः ?

(ख) गीतानुसारेण 'मिथ्याचार' इत्यस्य शब्दस्य कोऽर्थः ?

(ग) ''ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन........''– वक्ता कः ? अत्र ज्यायसी इति शब्दस्यार्थः कः ?

विभाग-ख

5. एकस्य प्रश्नस्योत्तरं प्रदेयम् – 12×1 = 12

(क) बृहदारण्यकोपनिषदाधारेण ब्रह्मणः स्वरूपमालोचयत।

(ख) बृहदारण्यकोपनिषदाधारेण जीवात्मन उत्क्रमणविषयम् आलोचयत।

6. एकस्य व्याख्या कार्या संस्कृतेन देवनागरीलिप्या च। 6×1 = 6

(क) येनाहं नामृता स्यां किमहं तेन कुर्याम्।

(ख) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इब ते तमो य उ विद्यायां रताः॥

7. द्वयोः अनुवादः कार्यः – 3×2 = 6

(क) विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्याया मृत्युं तीर्त्वा विद्यायाऽमृतमश्नुते॥

(ख) स विश्वकृत् स हि सर्वस्य कर्त्ता।
तस्य लोकः स उ लोक एव॥

(ग) तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः।
नानुध्यायाद् बहुञ्छब्दान् वाचो विग्लापनं हि तदिति॥

8. संस्कृतभाषया देवनागरीलिप्या च द्वयोः संक्षिप्तमुत्तरं प्रदेयम् – 3×2 = 6

(क) बृहदारण्यकोपनिषदि कति काण्डानि सन्ति ? तेषां नामानि लिखत।

(ख) बृहदारण्यकोपनिषद् कस्य वेदस्य अन्तर्गतः ?

(ग) आत्मज्ञानं विना का दुर्गतिः ?

——×——